# सञ्चारिणी दीपशिखा

दीपशिखायाः चतुर्थः अङ्कः पूज्यानां विवेकानन्दस्वामिचरणानां जन्मदिने प्राकट्यम् आगतः इति उद्घोषयन् महान्तं सन्तोषम् अनुभवामि। अष्टाभिः लेखैः सुशोभितः अयम् अङ्कः नूनं पाठकानां हर्षं तनुयाद् इति आशास्महे। अभिज्ञानशाकुन्तलस्य प्रसिद्धं श्लोकम् अन्वयपदार्थादिपुरस्सरं व्याख्यातवान् BA-वर्गे द्वितीयवर्षे अध्येता रणितनायेकः श्लाघार्हः। स्वामिविवेकानन्दप्रणीतस्य श्रीरामकृष्णस्तोत्रस्य टीकाम् अरचयद् आवीरलालः। प्राचीनटीकाकृतां शैलीं भाषां प्रौढिमानं च अनुकुर्वतः अस्य टीकाकारस्य शास्त्रचर्चापरम्परायां नदीष्णता अनया ऊह्यते। विशेषतः येन स्वरेण इदं स्तोत्रं गीयते तस्य स्वरस्य अपि रागादिसंयोजनं कथम् इति विचारयन् एष लोकस्य महद् उपकरोति इति निश्चप्रचम्। स्वामिविवेकानन्दस्य प्रख्यातं भाषणं हिन्दुधर्मः श्रीरामकृष्णश्च इति शीर्षकाङ्कितं संस्कृते अनूद्य वेदार्थानन्दस्वामी कार्तज्ञ्यभाग् भवति। इत्थं श्रीरामकृष्णलीलाप्रसङ्गस्य अनुवादाय धन्यतावचनैः भूष्यते शान्तनुनायेकः। अपि च, पूज्यैः गम्भीरानन्दस्वामिभिः विरचितस्य ब्रह्मानन्दस्वामिपादानां जीवनवृत्तस्य तथा च वन्दनीयचरणारविन्दैः ब्रह्मानन्दस्वामिपादैः सङ्कलितानां श्रीश्रीरामकृष्णोपदेशानाम् अनुवादं कृतवद्भ्यां ब्रह्मचारिभ्यां मनोमय-शुभदीपाभ्यां कृतज्ञता व्यज्यते।

प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीनां श्रीमताम् आत्मप्रियानन्दस्वामिचरणान्, विभागाध्यक्षान् जपसिद्धानन्दस्वामिपादान् च प्रणमामः। पत्रिकायाः सम्पादने यथायथं साहाय्यम् आचरितवतां समेषां सकार्तज्ञ्यं स्मृत्वा विरमामो विस्तरात्।

मुख्यसम्पादकः